श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीमद्वेदान्तदेशिकप्रदर्शिता

# ॥ मूलमन्त्रप्रतिपादिता अष्टोत्तरशतनामावळिः ॥

*This document* has been prepared by*

**Sunder Kidambi**

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ मूलमन्त्रप्रतिपादिता अष्टोत्तरशतनामावळिः ॥

| | | | |
|---|---|---|---|
| 1 | ओं रक्षकाय नमः | 2 | ओं स्वभावसिद्ध रक्षकाय नमः |
| 3 | ओं सर्वविषय रक्षकाय नमः | 4 | ओं रक्ष्यवस्तुविशेषानुरूप नानाप्रकार रक्षकाय नमः |
| 5 | ओं सर्वदा रक्षकाय नमः | 6 | ओं सर्वत्र रक्षकाय नमः |
| 7 | ओं सर्वप्रकार रक्षकाय नमः | 8 | ओं स्वार्थ रक्षकाय नमः |
| 9 | ओं सर्वरक्षकत्वापेक्षित सर्वज्ञाय नमः | 10 | ओं सर्वशक्तये नमः |
| 11 | ओं स्वेच्छाव्यतिरिक्त निवार्याय नमः | 12 | ओं अनतिक्रमणीय संरक्षण संरम्भाय नमः |
| 13 | ओं परमकारुणिकाय नमः | 14 | ओं अवसरप्रतीक्षाय नमः |
| 15 | ओं व्याजमात्र सापेक्षाय नमः | 16 | ओं आश्रितसुलभाय नमः |
| 17 | ओं विश्वसनीयाय नमः | 18 | ओं सापराधघटनाद्यनुगुण विशेषणवते नमः |
| 19 | ओं शेषिणे नमः | 20 | ओं निरुपाधिक शेषिणे नमः |
| 21 | ओं नित्य शेषिणे नमः | 22 | ओं सर्वविषय शेषिणे नमः |
| 23 | ओं अनन्य शेषिणे नमः | 24 | ओं गुणकृत शेषिणे नमः |
| 25 | ओं सपत्नीक शेषिणे नमः | 26 | ओं समाभ्यधिकरहिताय नमः |
| 27 | ओं आत्महविरुद्देशार्हाय नमः | 28 | ओं अचिद्बद्ध मुक्तनित्य विलक्षणाय नमः |

| | | | |
|---|---|---|---|
| 29 | ओं परशेषित्व हेतवे नमः | 30 | ओं स्वतः कर्त्रे नमः |
| 31 | ओं शक्त्याधारकाय नमः | 32 | ओं प्रेरकाय नमः |
| 33 | ओं अनन्य प्रेर्याय नमः | 34 | ओं अनुमन्त्रे नमः |
| 35 | ओं कर्मसाक्षिणे नमः | 36 | ओं सहकारिणे नमः |
| 37 | ओं प्रियप्रवर्तकाय नमः | 38 | ओं निरुपाधिकनन्तव्याय नमः |
| 39 | ओं वशीकार्याय नमः | 40 | ओं सिद्धोपायाय नमः |
| 41 | ओं साध्योपाय हेतवे नमः | 42 | ओं श्रुतिस्मृतिरूपाज्ञावते नमः |
| 43 | ओं दण्डधराय नमः | 44 | ओं सर्वसमाय नमः |
| 45 | ओं आश्रितपक्षपातिने नमः | 46 | ओं अविद्यादि हेतवे नमः |
| 47 | ओं अविद्यानर्हाय नमः | 48 | ओं आश्रिताविद्यानिवर्तकाय नमः |
| 49 | ओं स्वरूपान्यथाभाव रहिताय नमः | 50 | ओं स्वभावान्यथाभाव रहिताय नमः |
| 51 | ओं सर्वनेत्रे नमः | 52 | ओं सर्वजगद्व्यापार लीलाय नमः |
| 53 | ओं सर्ववेदान्त प्रधान प्रतिपाद्याय नमः | 54 | ओं सर्वोपादानाय नमः |
| 55 | ओं सर्वनिमित्ताय नमः | 56 | ओं सत्यसङ्कल्पाय नमः |
| 57 | ओं सर्वशरीरिणे नमः | 58 | ओं सर्वशब्दवाच्याय नमः |
| 59 | ओं सर्वकर्म समाराध्याय नमः | 60 | ओं सर्वफलप्रदाय नमः |
| 61 | ओं सर्वविधबन्धवे नमः | 62 | ओं सर्वव्यापकाय नमः |
| 63 | ओं निरतिशय सूक्ष्माय नमः | 64 | ओं सर्वाधाराय नमः |

| | | | |
|---|---|---|---|
| 65 | ओं स्वनिष्ठाय नमः | 66 | ओं सत्याय नमः |
| 67 | ओं ज्ञानाय नमः | 68 | ओं अनन्ताय नमः |
| 69 | ओं आनन्दाय नमः | 70 | ओं अमलाय नमः |
| 71 | ओं निरूपितस्वरूपविशेषणा- नुक्तानन्त गुणवते नमः | 72 | ओं नित्यदिव्यमङ्गलविग्रहवते नमः |
| 73 | ओं परव्यूहाद्यवस्थावते नमः | 74 | ओं सत्यावताराय नमः |
| 75 | ओं अप्राकृतावताराय नमः | 76 | ओं अकर्मवश्यावताराय नमः |
| 77 | ओं अकालनियमावताराय नमः | 78 | ओं आश्रितार्थगुणपरीवाहाय नमः |
| 79 | ओं सर्वावस्थशुभाश्रयाय नमः | 80 | ओं सर्वावस्थलक्ष्मीसहचराय नमः |
| 81 | ओं दिव्यभूषणायुध महिषीस्तान परिजन परिच्छद द्वारपाल पार्षदादिमते नमः | 82 | ओं स्थूलशरीरविश्लेषकाय नमः |
| 83 | ओं विश्रमस्थानाय नमः | 84 | ओं अनुग्रहविशेषवते नमः |
| 85 | ओं ब्रह्मनाडीद्वार प्रकाशकाय नमः | 86 | ओं ब्रह्मनाडी प्रवेशकाय नमः |
| 87 | ओं ब्रह्मरन्ध्रोत्क्रान्तिहेतवे नमः | 88 | ओं अर्चिराद्यातिवाहिकनियोक्त्रे नमः |
| 89 | ओं सूर्यद्वारादि नेतृत्ववते नमः | 90 | ओं अण्डावरण प्रकृतिमण्डला- तिक्रमहेतवे नमः |
| 91 | ओं विरजातीर प्रापकाय नमः | 92 | ओं सूक्ष्मशरीरविश्लेषकाय नमः |
| 93 | ओं अप्राकृतदेहप्रदाय नमः | 94 | ओं दिव्याप्सरस्सत्कारादि प्रयोजकाय नमः |

| | | | |
|---|---|---|---|
| 95 | ओं ब्रह्मगन्धादि प्रवेशकाय नमः | 96 | ओं नित्यमुक्तसत्कारविशेष हेतवे नमः |
| 97 | ओं पर्यङ्कादिरोहण पर्यन्तादरवते नमः | 98 | ओं परिपूर्णानुभवहेतवे नमः |
| 99 | ओं प्रधानप्राप्याय नमः | 100 | ओं सदेहविदेहबहुदेहकृतसर्वविध कैङ्कर्यप्रतिसम्बन्धिने नमः |
| 101 | ओं अवाप्तसमस्तकामाय नमः | 102 | ओं निरतिशयानन्दवते नमः |
| 103 | ओं निरतिशयभोग्याय नमः | 104 | ओं सर्वप्रकारभोग्याय नमः |
| 105 | ओं सर्वदानुकूल स्वभावाय नमः | 106 | ओं अत्यन्ततुल्यभोगप्रदाय नमः |
| 107 | ओं आश्रितविश्लेषासहाय नमः | 108 | ओं अपुनरावृत्तिहेतवे नमः |

॥ इति मूलमन्त्रप्रतिपादिता अष्टोत्तरशतनामावळिः संपूर्णा ॥